# ५३. आमरकुण्डपद्मावतीदेवीकल्पः ।

**आमरकुण्डक**नगरे **तिलङ्ग**जनपदविभूषणे रुचिरे ।
गिरिशिखरभुवनमध्यस्थिता जयति **पद्मिनीदेवी** ॥ १ ॥

अस्ति [1]स्वस्तिकरसमस्तगुणगणनीरन्ध्रेषु **अन्ध्रेष्वामरकुण्डं** नाम नगरमभ्रंलिहरम्यहर्म्यश्रेणिविश्राणितनयनानन्दं[2] स्निग्धनानाविधच्छायातरुपरिष्कृतं मञ्जुगुञ्जन्मधुकरनिकरपरिकरितकुसुमसौरभसंरम्भ[3]सुरभीकृतदिग्वलयं विमलबहलसलिलकलिलसरित्सरोवरशोभितं दुर्गमदुर्गतया विपक्षपक्षैरक्षोभितम् । किं वा तस्य पुरवरस्य वर्णयामः ?—यत्र करवीरसुमनसोऽपि मृगमदगन्धयः । विशिष्टेक्षुयष्टि-विपुलकदलीफल-चङ्गनारङ्ग-नैकप्रकारसहकार-सरसपनस-पुन्नाग-नागवल्ली-पूग-स्वादुच्च(त्व)शालिनालिकेरफलप्रभृतीनि हृद्यखाद्यानि; फलन्ति प्रतिऋतु सौरभ्यभरनिर्भरवासितदिक्पालयः शालयः, वीक्ष्यन्ते परीक्षकैर्विपणिषु पट्टांशुकप्रमुखासिचयनिचयमौक्तिकरत्नादीन्यगण्यानि पण्यानि । इत एव निष्पन्न**मुरंगल**व्यपदेशपेशल**मेकशिलापत्तनम्** । तत्समीपभूमिमलंकरिष्णु**विष्णुपद**चुम्बिशिखरपरम्पराशेखरितः सर्वतो रमणीयः पर्वतः पातयितुमीश्वरः सौन्दर्यगर्वतः पर्वतराजमास्ते । तदुपरि परिणाहारोहशालिश्री**ऋषभ-शान्तिनाथा**दिजिनप्रतिमालङ्कृताः कृतजनमनःप्रसादाः प्रासादाः[4] शोभन्ते शुभंयवः । तत्रैकत्र पवित्रतरे पारगतसद्मनि छद्मनिर्मुक्तमना मनागपि न[5] विषयसुखैः क्षुभितहृदयः *सहृदयहृदयाह्लादिदयोदयः* प्रतिवसति स जितस्मरो विस्मयकारिचरणचर्यावशीकृत**पद्मावतीदेवी**लब्धप्रतिष्ठो **मेघचन्द्र**नामा दिगम्बरः [6]व्रतिपतिरेकोऽनेकान्तिषत्परिषदन्वासितपदः । स चैकदा श्रावकगोष्ठीमनुज्ञाप्य प्रतस्थे स्थानान्तरविहरणाय । यावत्कियतीमपि भुवमगमत्, स्वहस्ताभरणं नाद्राक्षीत् पुस्तकम् । ततश्चाहो नः प्रमद्वरता येन स्वपुस्तकमपि व्यस्मार्ष्मेति क्षणं विषद्य सद्यश्छात्रमेकं क्षत्रियजातीयं **माधवराज**नामधेयं व्यावर्तयत् पुस्तकानयनाय । स च[7] छात्रो वलित्वा मठमशठमतिर्यावत्प्रविशति तावदपश्यदेकयाऽद्भुतरूपधेयश्रिया स्त्रिया तं पुस्तकमूरूपरि न्यस्तम् । यावन्निर्भीकमक्षुब्धचेतास्तदूरोर्ग्रहीतुं प्रवृत्तस्तं तावत्सा वरवर्णिनी तत्पुस्तकं स्वस्कन्धदेशस्थमदीदृशत् । तदनु स छात्रो मात्रोत्तीर्णवैया[8]त्यात्तदूरौ चरणं दत्वा स्कन्धादपि तद्ग्रहीतुं प्रावृतत् । ततस्तया राज्यार्होऽयमिति विमृश्य विधृतः करे, अभिहितश्च—वत्स ! किमपि वृणु, तत्तुभ्यमहं प्रयच्छामि । तुष्टाऽस्मि तव साहसिक्येन । तदनन्तरं शिष्येण निजगदे—जगदेकवन्द्यो मद्गुरुः सर्वं मह्यमभिरुचितमर्थं प्रदातुं समर्थ एवास्ति । तत्किमहं शुभवति ! भवतीं प्रार्थये इत्यभिधाय छात्रः पुस्तकमादाय च स्वाचार्यसविधमागच्छत् । तदखिलमपि स्वरूपं निवेद्य पुस्तकमाचार्याय समार्पिपत् । क्षपणकगणाधिपतिरवोचद्—भद्र ! सा न स्त्रीमात्रं, किन्तु भगवती **पद्मावती** देवता सा । तद्गच्छ, लिखितहृद्यपद्यमिदं पत्रं तस्यै दर्शयेति । गुर्वादेशं तथेति प्रतिपद्य सद्य एव विनेयो व्याघुट्य तं मठं गत्वा तस्यै तत्पत्रं समर्प्य पुरस्तस्थौ । देव्यप्यवाचयत्; यथा—

अष्टौ दन्तिसहस्राणि नव कोट्यः पदातयः । रथाश्वा लक्षसंख्याश्च कोशश्चास्मै प्रदीयताम् ॥ १ ॥

भगवत्यपि पद्यार्थमवधार्य तस्मादन्तेवासिने चतुरगस्तुरगः प्रददे । जगदे चासौ—यदेनमधिरुह्य व्रजतु भवान् । यत्पत्रे लिखितमास्ते तत्सर्वं त्वत्पृष्ठत एव समेष्यति । केवलं गिरिवराऽध्वना त्वया गन्तव्यम्, पृष्ठतश्च नावलोक्यम्—इति तद्वचनं तथेत्युरीकृत्य कृत्यवित्तद्गिरिविवरमनुप्रावीविशदश्वम् । यावद् द्वादश योजनान्यव्राजीद्वाजी । ततः पश्चादागच्छदतुच्छकरिघटाघण्टाटणत्कारतुमुलमतुलमुभाकर्णिण समाकर्ण्य कुतूहलोत्तालतया स छात्रः सपदि पश्चाद्भागं सिंहावलोकितन्यायेन निभालयांबभूव । यावदवैक्षिष्ट करितुरगादिसमूहसङ्कुलां सेनाम् । तस्मिंश्च विस्मयरसमयहृदयीभूते तत्रैव द्वादशयोजनान्ते स तदधिष्ठितस्तुरङ्गमपुङ्गवोऽवास्थित । तदनु च स **माधवराजः** परमजैनस्तया पृतनया परिवृतस्तत्रैव नगरं निवेश्य तत्र देव्या भवनं च विधाप्य पुनरा**नमत्कुण्ड( आमरकुण्ड ?)** नगरमागत्य राज्यलक्ष्मी

---

1 C स्वस्ति समस्त° । 2 C नयानन्दं । 3 'संरंभ' नास्ति B । 4 B 'प्रासादाः' नास्ति । 5 'न' नास्ति Pa ।
* C नास्ति वाक्यमिदम् । 6 Pa व्रतपति° । 7 'च' नास्ति Pa । 8 C वैयावृत्यात्त° ।

[1]पर्यपालयद्भूपालमौलिलालितशासनः । प्रासादं चाभ्रंकषशिखरं हिरण्मयदण्डकलशध्वजभ्राजिष्णुमचीकरत् । प्रत्यतिष्ठिपच्च तत्र चित्रीयमाणनमस्कुर्वाणमनुष्यचेतसं श्री**पद्मावतीं** देवीम् । पर्यपूपुजच्च पर्याप्तभक्तितरङ्गितमनास्त्रिषवणमष्टविधपूजया । विद्यते च तदद्यापि भुवनोदरव्यापिमाहात्म्यं भगवत्या मन्दिरममन्दलक्ष्मीकं भव्यजनतया पर्युपास्यमानम् । तस्य च गिरिविवरस्य[2] द्वारि विपुलशिलापट्टमद्यापि दत्तमस्ति, यथा तेन पथा सर्वोऽपि न प्रविशति । तत्र हि शिलामुद्घाट्य महतीं पूजां कृत्वा प्रविश्य प्रथमं लुठता गन्तव्यं कियतीमपि कलाम्, तदग्रे चोपविष्टैश्चलनीयम्, अग्रेतरां च महत्यवकाशे ऊर्ध्वर्जुभिरेव यावद्देवीसदनं किल गन्तव्यमिति । प्रत्यूहव्यूहसंभावनया कष्टभयाच्च न कश्चित्प्रायस्तद्विवरद्वारमुद्घाटयितुं पाटवमसाहसिकः कलयतीति शिलापिहितद्वारि विवरस्थान एव सर्वेऽपि श्रद्धालवः **पद्मावत्याः** पूजां कुर्वते; प्राप्नुवन्ति च विष्वद्रीचीरभिरुचितार्थसिद्धीः । **माधवराजस्य कंकतिग्राम**वास्तव्यत्वात्तद्वंशजाः **पुरंटिरित्तमराज-पिण्डिकुण्डिमराज**[3]**-प्रोल्लराज-**[4]**रुद्रदेव-**[5]**गणपतिदेवाः । गणपतिदेव**पुत्री च **रुद्रमहादेवी** पञ्चत्रिंशद्वर्षकृतराज्यस्ततः श्री**प्रतापरुद्रः** । एते **काकतीया** इति प्रसिद्धाः ॥

श्री**मदाराम (०दामर ?) कुण्डाख्यपद्मावत्या** यथाश्रुतम् । अजल्पि कल्पलेशोऽयं श्री**जिनप्रभ**सूरिभिः ॥१॥

**॥ इति श्रीआमरकुण्ड[6]पद्मावतीदेवीकल्पः ॥**

॥ ग्रं० ५९, अ० २२ ॥

---

1 Pa परिपालयद् । 2 Pa गिरिवरस्य । 3 B पिण्डकुण्डिमराज; Pa °कुण्डिइदिमराज । 4 Pa प्रोल्लपराज° । 5 C रुद्रगणपति° । 6 Pb आरम°; C आराम° । 7 Pa सगाइअगयहि° ।